मूलस(स्स)रेसु उड्ढं(ड्ढं), अहो [य] धातुस्सरेय(सु) सवेसु ।
सेसेसु तिरि[य]भागे, गेहे दत्थं(बं) तु[ह?] परोक्खं ॥ १७३ ॥

मूलस्वराः 'ई ऐ औ' एतेषु दृष्टेषु प्रश्ने ऊर्द्ध्वभागे द्रव्यं तिष्ठतीत्यादेश्यम् । धाम्यधातुस्वरौ द्वौ 'उ ऊ' आभ्यां दृष्टाभ्यां अधोभागे द्रव्यं तिष्ठतीत्यादेश्यम् । शेषेषु—'अ आ इ ए ओ' एषां पञ्चानां अन्यतमाधिक्ये तिर्यग्भागे द्रव्यमवतिष्ठत इत्यादेश्यम् । स्वगृहे संचयं द्रव्यं नष्टं तदेभिः स्वरै[प० ९१, पा० १]ज्ञा(र्ज्ञा)तव्यमिति ॥ १७३ ॥

जल देवय अग्गिख(घ)रं, दिट्ठे वत्थुंमि ति[न्नि?] नि(ति)ट्ठाणं ।
लक्खेज्ज जीव धाउं, मूलाण य तिनि(न्नि) वाणइ(ठाणा)इं ॥ १७४ ॥

क च ट त प य सा(शा)[नाम]न्यतमाधिके प्रश्ने जलगृहे द्रव्यमादेश्यम् । ख छ ठ थ फ र षा णां चतुर्थवर्गसंज्ञकानां चान्यतमाधिके प्रश्ने गोशालायां द्रव्यमिति ज्ञेयम् । ग ज ड द ब ल सा नामन्यतमाधिके प्रश्ने देवगृहे द्रव्यमादेश्यम् । ङ ञ ण न माधिके प्रश्ने अग्निगृहे द्रव्यमवतिष्ठत इत्यादेश्यम् । मिश्रेषु यत्संबंधिनोऽक्षरा बहव[ः] तस्मिन् द्रव्यमिति ज्ञेयम् । जीवयोनौ लब्धायां जीवो नष्टसि(ष्ट इ)त्यादेश्यः । मूलयोनौ लब्धे मूलम्, धातुयोनौ लब्धे धा[प० ९१, पा० २]तुद्रव्यम(व्यं न)ष्टमित्यादेश्यम् । तच्च त्रिखे(ष्वे)व स्थानेष्विति नष्टिकास्वगृहकाण्डम् ॥ १७४ ॥

छिद्दे तत्थंरिपं(रत्थंतरियं?), परवक्कु(त्थु)मणंतरं घणे दिट्ठे ।
जो च्चिय वत्थु निवेसे, गमओ सो चेव रत्थासु ॥ १७५ ॥

क-गादीनां प्रथम-तृतीयवर्गीयानां छिद्रसंज्ञकानां अन्यतमाक्षराधिके प्रश्ने रथ्यान्तरितं द्रव्यमादेश्यम् । ख-घादीनां वर्गाक्षराणां घनसंज्ञ[प० ९२, पा० १]कानां अन्यतमाधिकानां प्रश्ने स्वगृहस्थानन्तरं यत्परगृहं [तस्मिन्]द्रव्यमित्यादेश्यम् । एवं [व]स्तुनिवेशविधिरुक्तः । पूर्वाऽऽग्नेयी दक्षिणे(णा) नै(र्ऋ)त्यपरा वायव्योत्तरेशानी चेति [दिक्] । यैरक्षरैगृ(र्गृ)हाभ्यन्तरे एतासु दिक्षु द्रव्यमभिहतं तैरेवाक्षरैस्तेनैव प्रकारेण रथ्यास्वपि द्रष्टव्यम् ॥ १७५ ॥

हस्सेसु समं ठाणं, सहावदीहे[प० ९२, पा० २]सु उण्णयं जाणे ।
पंचम छट्ठे य सरे, दोसु वि णिण(णि)ण्णं मुणेयबं ॥ १७६ ॥

ह्रस्वानां 'अ इ ए ओ' एतेषामन्यतमाधिके प्रश्ने समस्थाने द्रव्यं तिष्ठतीत्यादेश्यम् । स्वभावदीर्घाणां '[ऊ ऐ]औ' एषामन्यतमाधिके प्रश्ने उन्नते भूभागे द्रव्यमवतिष्ठत इति वाच्यम् । पञ्चमस्वर[उकारः], षष्ठस्वर ऊकारः, अनयोर्दृष्टयोर्नि(र्नि)म्नोन्नतभूभागे द्रव्यं तिष्ठतीत्यादेश्यम् ॥ १७६ ॥

ततियस्सरो वि रत्थं, कवे(थे)ति जइ वंज[प० ९३, पा० १]णे य संजुत्तो ।
उत्तर-वंजणसहिते, बितिए उच्चं हवइ ठाणं ॥ १७७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तृतीयस्वर इकारः, स उक्तान्यतमाक्षरोपरिगतो रथ्यायां द्रव्यमाचष्टे । द्वितीयस्वर आकारः, सोऽभिहितोत्तराक्षर(रा)न्यतमसंयुक्तो रथ्यायामेव द्रव्यं कथयति ॥ १७७ ॥

सविसग्गेसु चउक्कं, साणुस्सारेसु अधरखरठाणं ।
लोइय-लोउत्तरियं, घणक्खरे देउलं लक्खे ॥ १७८ ॥

सविसर्गः 'अ'कारः, स यदा प्रश्ने अन्यतमाक्षरपार्श्वस्थि[प० ९३, पा० २]तो दृश्यते केवलो वा तदा चतुष्पथे द्रव्यमादेश्यम् । एकादशमोऽनुस्वारः 'अं' यदाऽन्यतमाक्षरोपरिगतो दृश्यते केवलो वा तदा तस्य चतुष्पथस्य पश्चिमदिग्भागे द्रव्यमवतिष्ठत इत्यादेश्यम् । घनाक्षराणां 'ख छ ठ थ फ र षा णां, घ झ ढ ध भ व हा नां' चान्यतमबहुले प्रश्ने लौकिकदेवकुले द्रव्यमादेश्यम् । [प० ९४, पा० १] लौकिकं देवकुलं शंकरायतनादिकम् । एतेष्वेव घनाक्षरेषूत्तरस्वरसंयुक्तेषु लोकोत्तरदेवकुले द्रव्यमादेश्यम् । लौकोत्तरिकदेवकुले(ल)मित्यर्हतायनं वक्तव्यम् ॥ १७८ ॥

सव्वत्थ [य] जीव-धातु-मूलाणं लक्खए तउट्ठा(ओ ठा)णा ।
एसो य गामदंडो, एसो वि य बाहिरो दंडो ॥ १७९ ॥

सर्वत्र जीव-धातु-मूलानां यदेतत्स्था[प० ९४, पा० २]नं नष्टस्योक्तं तच्च जीव(वं) धातु(तुं) मूलं चेति त्रयम(से)वावधार्यादेशः कार्य इति । तत्र तत्र स्थाने एष दंडो बहिरभ्यन्तरे च ग्रामस्योक्तः । दंडशब्देन च नष्टं व(ध)नमुच्यते ॥ १७९ ॥

॥ नष्टिको(का)चक्रं समासम् ॥

एतो(त्तो) चिंतविभागो, मुट्ठिविसेसेण अक्खरुप्पत्ती ।
गेहिरिखा(गहरिक्खा)णं सूया, सव्वेसिं उवगयविसेसो ॥ १८० ॥

अतः परं चिन्तावि[प० ९५, पा० १]भागस्य मुष्टिविशेषस्य ग्रहाणां नक्षत्राणां च सूचनं लेसो(शो)देशेन यथावसरमुत्पत्तिप्रदर्शनं तथाक्षरोत्पादनं च मुष्ट्या ग्रहरि(ऋ)क्षाणां च वर्णया(ना?ता)मुपगतविशेषमिति वक्ष(क्ष्य)माणोपन्यासार्थना(ता?) । उपगतः शब्दप्राप्तपर्यायः ॥ १८० ॥

तह सद्दणिण्णओ वि[य], सव्वे भावा य सव्वदव्वाणं ।
णंदावत्ते जोए, सत्त वियप्पा [प० ९५, पा० २] हवंति इमे ॥ १८१ ॥

पटहास्फोटित-कुड्यपतनादिशब्दो भावशब्देन निन(र्ण)यवर्णाकृतिप्रमाणादीनि भण्यन्ते । सर्वभावा अक्षरप्रतिबद्धाः 'लाभालाभ-सुखदुःख-जीवितमरण' इत्याद्यक्षरप्रतिबद्धाः । सकलद्रव्याणां नन्दिकावर्त्ताक्ये(ख्ये) करणे सप्त भेदा भवन्तीति वक्ष्यमाणोपन्यासः ॥ १८१ ॥

तथा चैतत्–

पढमो चिंताभेदो, तस्स य भेदा हवंति अट्ठ इमे ।
जीवादीणं जोणी, तिविहो पढमो हवति भेदो ॥ १८२ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तेषां सप्तानां भेदानां [प० ९६, पा० १] मध्ये प्रथमचि(श्चि)न्ताभेदः। तस्य भेदा भवन्त्यष्टौ वक्ष्यमाणाः। जीव-धातु-मूलानां योनिस्त्रिविधा या सा प्रथमचिन्ताभेदे पतति ॥ १८२॥

गुरु-लहुय अक्खराणं, संजोओ बितियओ हवंते(वति) भेदो।
तितीओ पीडासद्धि(हि)ओ, ततो(त्तो) अभिघातिता तिन्नि ॥ १८३ ॥

गुरु-लघ्वक्षराणां संयोगो द्वितीयो भेदः। पीडाभेदस्तृतीयकः। क(कः) पुनरसौ? अधा-(धो)मात्रा अप्रधाना येऽभिहताः रेफ-यकार-उकार-ऊकार-सहिताः। आलिंगितश्चतुर्थः। अभिधूमितः पंचमः। दग्धः षष्ठो भेद [प० ९६, पा० २] इति ॥ १८३ ॥

एक्को पयडिविसेसो, सत्तमओ संकडाइ अट्ठमओ।
एत्तो चिंताभेदा, पणयालीअक्खरुप(प्प)ण्णा ॥ १८४ ॥

एकः प्र[कृ]तिविशेषकः। कु(कः)पुनरसौ? जीवप्रकृति-धातुप्रकृति-मूलप्रकृति[रूपः]॥ सप्तमो भेदः। संकट-विकटभेदा(दो)ऽष्टम उक्त एव। एते चिन्ताभेदाः पंचचत्वारिंशदक्षरप्रतिबद्धा इति ॥ १८४ ॥

॥ चिन्ताभेदप्रकरणं समाप्तम् ॥ [प० ९७, पा० १]

दुग दुग तिग तिग य चतू, चतुक्क पण पण छ सत्त वसु णवया।
णामक्खराण य सरा, हवं(हों)ति आ(अ)कारादिणं कमसो ॥ १८५ ॥

अ	आ	इ	ई	उ	ऊ	ए	ऐ	ओ	औ	अं	अः
२	२	३	३	४	४	५	५	६	७	८	९

अकारो द्विसंख्यः। आकारोऽप्य(पि) द्विसंख्य एव। [प० ९७, पा० २] इकारस्त्र(स्त्रि)संख्यः। ईकारोऽपि त्र(त्रि)-संख्या(ख्य) एव। उकारच(श्चतुः)संख्या(ख्यः)। ऊकारश्चतुःसंख्या(ख्य) एव। एकार[ः] पञ्चसंख्या(ख्यः।) ऐकारोऽपि पञ्चसंख्या(ख्य) एव। ओकार[ः] षट्संख्या(ख्यः)। औकार[ः] सप्तसंख्या(ख्यः)। अंकारः स्वा(सा)नुस्वरोऽष्टसंख्यो(ख्यः)। अकारः सविसर्गो नवसंख्या(ख्यः)। अकारादय[ः] स्वरा द्वादश अक्षरैर्युक्ता [प० ९८, पा० १] यथोक्तसंख्या द्रष्टव्या इति ॥ १८५ ॥

द्वितीयप्रकारः—

चउ तिं तिं चउक्क चउत्थ, चउ सत्त वयुहण(ट्ठऽट्ठ णवय)वग्गं च।
संखापरिमाणे तस(स्स)राणऽगाराइणं कमसो ॥ १८६ ॥
एगादीया पंच उ, कमादी(दि) अणुणासियावसाणाणं।
कमसो णाम ए(प)माणं, पंचइ(चाण) वि आणुपुव्वीए ॥ १८७ ॥

ककार एकसंख्या(ख्यः)। खकार[रो] द्विसंख्या(ख्यः)। गकारस्त्र(स्त्रि)संख्या(ख्यः)। घकारचतु(श्चतुः)संख्य[ः]। ङकार[ः] पञ्चसंख्य इति। एवं क-गादि-ङकारपर्यवासानां क्रमसः(शः) [प० ९८, पा० २] संख्याऽभिहतेति ॥ १८७ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

जो दे(ये)व कवग्गकमो, चादीणं सेसयाण सो चेव ।
वग्गाण होइ गमओ, जाव ण केण(णा)वि संजुत्तो ॥ १८८ ॥

य एव संख्यां प्रति [क]वर्गस्य क्रम[ः], स एव चादीनां वर्गाणां क्रमो ज्ञेयः । स्वरेणाक्षरेण वा असंयुक्तानां अनभिहतानां चेति ॥ १८८ ॥

जावतिया संजुत्ता, पत्ते पत्तेसि(वि?) मेलिया संखा ।
आलिंगियाइ तत्तो, विसुद्धसेसा हवइ संखा ॥ १८९ ॥

स्वरेणाक्षरेण वा युक्ते(क्तो) वर्णेन वा अग्रतो वाऽनंतरमवस्थितेन यः पूर्वाक्षर[ः] स संयुक्त इत्युच्यते । स संयोगो येन कृतः स आ[प० ९९, पा० १]लिंग्यमालिंगयति, अभिधूसयं(यि)तव्यमभिधूर्म[य]ति, दग्धव्यं दहतीति । आलिंगिताभिधूमितदग्धप्रकाराश्च पूर्वोक्ताः । आलिंगिताभिधूमितदग्धानां मध्ये यो(या) विद्यते संख्या तां सो(शो)धयित्वा विशुद्ध(द्धाऽ)वसि(शि)ष्टा संख्या भवति तथा देस(शः) कार्यः प्रष्टु[ः] सा भ[प० ९९, पा० २]ण्यते ॥ १८९ ॥

एक्क[क] तिय तिय दुय दुय, चतु चतु पण छक्क सत्त वस(सु)हं च ।
कमसो अक्खरमाणं, अवग्गजोए ककारस्स ॥ १९० ॥

एवं सर्ववर्गेषु ज्ञेयम् । एकः [एकः] तृ(त्रि)कः [त्रिकः द्विकः द्विकः] चतुष्कः चतुष्कश्च पंचा(च) षट् सप्ताष्टौ अकारादिभिः स्वरैः सविसर्गाकारपर्यन्तेद्वा(न्तैर्द्वा)दशभिरन्वितानां ककारादीनां अक्षराणां ज्ञेया संख्या क्रमेण यावद् द्वादश इति ॥ १९० ॥

एमेव(वं) [प० १०१, पा० २] सेसाणं, खाएही(दी)णणुणासिय(या)वसाणाणं ।
णामपमाण(णं) कमसो, उत्तरवट्टी(ड्ढी)ए नायव्वो(वं) ॥ १९१ ॥

एवमेव शेषाणामपि यथा ककारस्य अकारादिद्वादशस्वरयोगेन संख्या विहिता तथा खादीनामपि अनुनासिकपर्यन्तानि(नां) नामप्रमाणं क्रमसः(शः) । तत्तो(थो?)त्तरवृद्धा(द्ध्या) ज्ञातव्यमिति पूर्वगाथायामेव प्रसंगेनोक्तमिति ॥ १९१ ॥

वो (जो) चेव [प० १०२, पा० १] कवग्गकमो, होति उ सो चेव सेसवग्गाणं ।
णामपमाण(णं) गमओ, अवग्गजोएण निप्पन्नो ॥ १९२ ॥

यं एव कवर्गस्य क्रमो भवति स एवावसि(शि)ष्टानां चादिवर्गाणां सवर्गपर्यन्तानां नामप्रमाणे गमयतां अवर्गयोगेन निष्पन्न इति । अकारादीनां स्वराणां हकारांतानां संयुक्तानां या संख्या सा पूर्वगाथायाः प्रसंगेन व्याख्याता ॥ १९२ ॥ [प० १०२, पा० २]

जह उ अवग्गेण समं, कवग्गमादीण सत्त(त्त)वग्गाणं ।
एवं चिय संजोओ, परोप(प्प)रं सेसयाणं पि ॥ १९३ ॥

उक्तार्थैव गाथा । यथा अवर्गेण सह कवर्गादीनां सप्तादिनां(सप्तानां) वर्गाणां संयोगो(गः) एव[मेव] परस्परां(रं) कादीनां हकारपर्यंतानां अक्षराणामपि संयोगो ज्ञेयः ॥ १९३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

क	का	कि	की	कु	कू	के	कै	को	कौ	कं	कः
१	१	३	३	२	२	४	४	५	६	७	८
ख	खा	खि	खी	खु	खू	खे	खै	खो	खौ	खं	खः
२	२	४	४	३	३	५	५	६	७	८	९
ग	गा	गि	गी	गु	गू	गे	गै	गो	गौ	गं	गः
३	३	५	५	४	४	६	६	७	८	९	१०
घ	घा	घि	घी	घु	घू	घे	घै	घो	घौ	घं	घः
४	४	६	६	५	५	७	७	८	९	१०	११
ङ	ङा	ङि	ङी	ङु	ङू	ङे	ङै	ङो	ङौ	ङं	ङः
५	५	७	७	६	६	८	८	९	१०	११	१२
								(१००)			
च	चा	चि	ची	चु	चू	चे	चै	चो	चौ	चं	चः
१	१	३	३	२	२	४	४	५	६	७	८
छ	छा	छि	छी	छु	छू	छे	छै	छो	छौ	छं	छः
२	२	४	४	३	३	५	५	६	७	८	९
ज	जा	जि	जी	जु	जू	जे	जै	जो	जौ	जं	जः
३	३	५	५	४	४	६	६	७	८	९	१०
झ	झा	झि	झी	झु	झू	झे	झै	झो	झौ	झं	झः
४	४	६	६	५	५	७	७	८	९	१०	११
ञ	ञा	ञि	ञी	ञु	ञू	ञे	ञै	ञो	ञौ	ञं	ञः
५	५	७	७	६	६	८	८	९	१०	११	१२
								(१००)			
ट	टा	टि	टी	टु	टू	टे	टै	टो	टौ	टं	टः
१	१	३	३	२	२	४	४	५	६	७	८
ठ	ठा	ठि	ठी	ठु	ठू	ठे	ठै	ठो	ठौ	ठं	ठः
२	२	४	४	३	३	५	५	६	७	८	९
ड	डा	डि	डी	डु	डू	डे	डै	डो	डौ	डं	डः
३	३	५	५	४	४	६	६	७	८	९	१०
ढ	ढा	ढि	ढी	ढु	ढू	ढे	ढै	ढो	ढौ	ढं	ढः
४	४	६	६	५	५	७	७	८	९	१०	११
ण	णा	णि	णी	णु	णू	णे	णै	णो	णौ	णं	णः
५	५	७	७	६	६	८	८	९	१०	११	१२
								(१००)			
त	ता	ति	ती	तु	तू	ते	तै	तो	तौ	तं	तः
१	१	३	३	२	२	४	४	५	६	७	८
थ	था	थि	थी	थु	थू	थे	थै	थो	थौ	थं	थः
२	२	४	४	३	३	५	५	६	७	८	९

द	दा	दि	दी	दु	दू	दे	दै	दो	दौ	दं	दः
३	३	५	५	४	४	६	६	७	८	९	१०
ध	धा	धि	धी	धु	धू	धे	धै	धो	धौ	धं	धः
४	४	६	६	५	५	७	७	८	९	१०	११
न	ना	नि	नी	नु	नू	ने	नै	नो	नौ	नं	नः
५	५	७	७	६	६	८	८	९	१०	११	१२
								(१००)			
प	पा	पि	पी	पु	पू	पे	पै	पो	पौ	पं	पः
१	१	३	३	२	२	४	४	५	६	७	८
फ	फा	फि	फी	फु	फू	फे	फै	फो	फौ	फं	फः
२	२	४	४	३	३	५	५	६	७	८	९
ब	बा	बि	बी	बु	बू	बे	बै	बो	बौ	बं	बः
३	३	५	५	४	४	६	६	७	८	९	१०
भ	भा	भि	भी	भु	भू	भे	भै	भो	भौ	भं	भः
४	४	६	६	५	५	७	७	८	९	१०	११
म	मा	मि	मी	मु	मू	मे	मै	मो	मौ	मं	मः
५	५	७	७	६	६	८	८	९	१०	११	१२
								(१००)			
य	या	यि	यी	यु	यू	ये	यै	यो	यौ	यं	यः
१	१	३	३	२	२	४	४	५	६	७	८
र	रा	रि	री	रु	रूं	रे	रै	रो	रौ	रं	रः
२	२	४	४	३	३	५	५	६	७	८	९
ल	ला	लि	ली	लु	लू	ले	लै	लो	लौ	लं	लः
३	३	५	५	४	४	६	७	७	८	९	१०
व	वा	वि	वी	वु	वू	वे	वै	वो	वौ	वं	वः
४	४	६	६	५	५	७	७	८	९	१०	११
श	शा	शि	शी	शु	शू	शे	शै	शो	शौ	शं	शः
१	१	३	३	२	२	४	४	५	६	७	८
ष	षा	षि	षी	षु	षू	षे	षै	षो	षौ	षं	षः
२	२	४	४	३	३	५	५	६	७	८	९
स	सा	सि	सी	सु	सू	से	सै	सो	सौ	सं	सः
३	३	५	५	४	४	६	६	७	८	९	१०
ह	हा	हि	ही	हु	हू	हे	है	हो	हौ	हं	हः
४	४	६	६	५	५	७	७	८	९	१०	११

तत्र संयोगो(गे) आलिंगिताभिधूमितदग्धसंख्या कथ्यते– विशेषसंख्या कथ्यते । विशेषसंख्यमानामा(संख्यानाम) प्रमाणमादेश्यम् । –

पढमक्खरसंखाए, जाणसु णामक्खराण परिमाणं ।
आलिंगि[प० १०३, पा० १]याइ तत्तो, एक्कोत्तरिया हवइ हाणी ॥ १९४ ॥

प्रश्नाक्षराणां प्रथमाक्षरस्य या संख्या ह्रस्स(स)ति । अभिधूमिता द्वे, दग्धास्तिश्रा (स्त्रः) संख्या ह्रसति ॥ १९४ ॥

सेसं उ णामसंखा, णिस्सेसमणंतरस्स संखाए ।
तत्तो नामपमाणं, पढमिल(ल्ल)कमेण णेयव्वं ॥ १९५ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तस्माद्य(द)क्षराद्य(द)भिघातशुद्धाद्याः(द्व या) शेषा समानाक्षरसंख्या निर्दिशा(ष्टा) यदा पूर्वाक्षरो(रा)भिघात(ते)न सकल(ला?) शुद्ध्यति तदा तस्या[ः] पूर्वस्यानन्तरादभिघातशुद्धाद्य(द्व्यः) शेष[ः] ते[न?] नामसंख्या ज्ञेया । तस्मान्नामाक्षरस्य [प० १०३, पा० २] प्रमाणं क्रमेण ज्ञातव्यमित्युक्तम् ॥ १९५ ॥

पढमो(मा) तइया संपत्कराओ थोवं च संखमिच्छंति ।
बितिय-चउत्था तेसिं, विपत्करा ते य बहुसंखा ॥ १९६ ॥

प्रथमाः – क च ट त प य शाः । तृतीयाः – ग ज ड द ब ल साः । तेषां संपत्कुर्वन्ति लो(ला)भकरा[ः]शुभैस्व(श्व)र्यचिंतायाः प्रष्टुः । कालतस्तु स्वल्पकालं भवति । तद्बहुले प्रश्नेऽल्पनामाक्षरसंख्या ज्ञेया । द्वितीयो वर्गः–ख छ ठ थ फ र षाः । चतुर्थो वर्गः–घ झ ढ ध भ व हाः । एते विपक्ष(त्क)रा अशुभकरा न लाभकरा इत्यर्थः । अल्पफलं बहुकालिकं च कुर्वन्ति । तद्बहुले प्रश्ने महती नामाक्षरसंख्या ज्ञातव्या ॥ १९६ ॥

एस सराणं गमओ, वग्गाणं सत्तमट्ठा(ट्ठमा)णं च ।
विसमक्खरम(व)ग्गाणं, चरिमाणं थोविआ संखा ॥ १९७ ॥

एष स्वराणां विधिरिति यद्व(दु)क्तं ह्रस्वस्वराः संपत्करास्ते महतिं(तीं) विभूतिं कुर्वन्ति । लाभकराश्च । नामसंख्याकरास्व(क्षराश्च ?) स्वल्पां कुर्वन्ति । शेषस्वरा विपत्करा अलाभकराः । नामाक्षरसंख्यां महतीं कुर्वन्ति । अमुमेवार्थं पूर्वोक्तं निर्दिशति । एवं स्वरवर्ग उक्तः । कादयस्तु पंच चान्ये वर्गा उक्ताः । सप्तमवर्गस्याष्टमवर्गस्य च वर्गसंख्या इह(है)वोक्ताऽष्टवर्गक्रमे । विषमाक्षरवर्गा ये, के ? क च ट त प य शाः, ग ज ड द ब ल सा स्व(श्च) । चरिमास्व(श्च ।)पंचवर्गेण 'ङ ञ ण न मा' स्व(श्च) । चरिमौ च 'अं अः' अनयोरप्यल्पसंख्या ज्ञेया ॥१९७॥

जे जे जहा सपक्खा, तेसिं दोण्हं पि मेलिया संखा ।
अभिहयसुद्धा दुगुणा, काऊणं निदि(द्दि)से संखा ॥ १९८ ॥

प्रश्नादौ योऽक्षरस्तस्य ये स्वपक्षा उच्यन्ते । यैरभिघात[प० १०४, पा० २]स्याक्षरस्य तत् कृ(क्रि)यते । स चानभिघातकः । व्यवहितोऽव्यवहितस्तु न दोषः । तयोर्द्वयोर्मिलितयोर्या संख्या तथा(या ?)नामनिर्देश[ः]कार्यः । इत्याद्यार्द्धकारिकाया व्याख्यानम् । एतत्तु विरुद्धम् । यत आदावुक्तम्–"पढमक्खरसंखाए जाणे नामक्खराण परिमाणं । आलिंगियाउ तत्तो, एक्कंतरिया हवइ हाणी ॥" इत्यनेन । उच्यते–अत्र उत्सर्गविहितो यो(ऽयं) विधिः । इह त्वपरपवादा(त्वपवादः) । उत्सर्गापवादाश्च सूत्रोपदेश [प० १०५, पा० १] इति । प्रागर्द्धेनाभिहि(ह)तस्य पक्षे द्व्यसंख्यायोगे संख्या नामाक्षराणामभिहता । यदा स्वपक्षौ अभिहतौ भवतस्तदा सत्यभिघाते अभिघातोक्तसंख्या(ख्यां) विशोध्य शेषा(षां) द्विगुणीकृत्य तदा प्रमाणे (तत्प्रमाणो) नामनिर्देशः कार्यः ॥१९८॥

परपक्खाणं संखं, अभिहयसुद्धं परोप्परं गुणए ।
सुण्णेण(णं) विहिऊणं, दव्वाणं निद्दिसे संखं ॥ १९९ ॥

यदा धातु-मूल-जीव-संख्या विज्ञातव्या । कियत्परिमाणमिति । तदा स्वपक्षसंख्या नांह्वी(?गी)कृ(क्रि)यते । परपक्षसंख्यैवाग्री(ङ्गी)कर्तव्या । अत्राप्युक्ता(क्त) एव विधिः । प्रश्नादौ योऽक्षरः,

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

योऽभिघातकः । तस्य यो व्यवहितोऽव्यवहितान्यः । अवव्यहितोकता(तोक्ता)भ्यामभिघातसु(शु)-द्धाभ्यां परस्परं गुणिने(ते)ति संख्यारूपमिवोच्यते । परस्परं संख्या [याः?] एकपिंडमापाद्य दस-(श)भिर्गुणय(यि)त्वा प्रष्टुद्र(द्रं)व्यसंख्यानिर्देशः कार्यः ॥ १९९ ॥

बहुसंख-अप्पसंखा, वट्ठ(ड्ढ)इ हाइति य अप्पसंखाओ ।
सोहे [प० १०६, पा० १] तु अप्पसंखं, दव्वाणं निद्द(द्दि)से संखं ॥ २०० ॥

अथ द्रव्य अल्प[बहु]संख्याया आनयनोप(पा)यः प्रकारान्तरेण कथ्यते–सकलं प्रश्नं गृह्य । बहुसंख्या द्वि-चतुर्थ-वर्गाक्षराः, अल्पसंख्या प्रथम-तृतीयवर्गाक्षराः । तेषां विद्यमानाभि-घातशुद्ध(द्धा)नामवसि(शि)ष्टसंख्यापिंडं स्थापयेत् । बहुसंख्यानामपि विद्यमानाभिघातशुद्धानां संख्यापिंडमवस्थापयेत् । द्वयोरनयोः संख्यापिंडयोर्या यत्र सुद्ध्यति तां [प० १०६, पा० २] तत्र सोव(शोध)यित्वा या परिशिष्टा नां(तां) शून्येन विश्वा द्रव्यसंख्या ज्ञेया ॥ २०० ॥

जह चेव दव्वसंखा, भणिया तह चेव कालपरिमाणं ।
एक्कमणसो करेज्जा, पुव्वाइतिउ(रिओ)वएसेणं ॥ २०१ ॥

यथैव द्रव्यसंख्याऽभिहिता तथा तेनैव प्रकारेण तस्या द्रव्यसंख्याया[:] कालपरिमाणं कुर्यात् । अनन्यमहानैमित्तिः(त्तिक)पूर्वाचार्योपदेशेनेति । तच्च कालपरिणाम(माणं) कालप्रकरणे यथा वक्ष(क्ष्य)तीति नोक्तमिहेति ।

अन्ये पठन्ति 'तहेव कालपरिमायणं' यथा द्रव्यस्य कालपरिमाणं उपचयापचयं वा प्रति । यथा पृष्टः(ष्टुः) [प० १०७, पा० १] आयु[:]प्रमाणमपि वक्तव्यम् । तदुच्यते–देवकीं(दैविकीं) प्रश्नं परिगृह्य मानसिं(नुषीं) वा सैवाकाशप्रश्नोच्यते । प्रष्टुज(र्ज)न्मकर्मनक्षत्रसंख्यामभिघातशुद्धामेकत्र संपिंड्य विसो(विंशो)त्तरस(श)तमध्यात्सो(च्छो)ध्यः । शेषं मध्यः । परमायुरेकांते स्थाप्य .त[:] प्रत्येकं गर्भरि(ऋ)क्षसंख्यां मेलयित्वा । स च एकोनविंशत्तमो ग्राह्यः । प्रश्नाच्च प्रत्येकं यो(या) यत्र शुद्ध्यति तां विशोध्य यत्से(च्छे)षं तत्पूर्वलब्धपरमायुम(र्म)ध्याच्छोध्यम् । प्रष्टना(ष्टुर्ना)माक्षरां स्वकालरूपां गणयित्वा छो(शो)धयेत् । शेषः स्फुटः परमायुःपिंडक इति । [प० १०७, पा० २] गतकालपरिज्ञानार्थं उदयनक्षत्रसंख्याभिघातशुद्धां संपिंड्यैकत्र द्विगुणं कुर्यादेकान्ते अवस्थाप्य ततः जन्मकर्मगर्भरी(ऋ)क्षाद्यक्षरसंख्यामभिघातरहितां संपिड्य(ड्या)नन्तरं द्विगुणीकृत्य संख्यां विशोध्य (?) भूयः सकलं नामाक्षरां सो(शो)धयित्वा शेषेण अतीतकाल इति । परमायुःपिंडाद्वि-शोध्य शेषमागा[प० १०८, पा० १]मिनी भवतीति । एवं नैमित्तिकपूर्वाचार्योपदेशेनानत्यमानं (? ऽनायुष्यमानं) कुर्यादिति ॥ २०१ ॥ तथा लेखाक्षरसंख्यापरिज्ञानार्थम्–

अक्खरमीसं दुग(गु)णं, वग्गेयव्वं सदा पयत्तेणं ।
पणपण्णभागसेसं, तंमि गुणा म(अ)क्खरं जाणे ॥ २०२ ॥

प्रश्नाक्षराणां या यस्य स्वरसंख्याऽभिहिता तां संख्यां सकलामेकीकृतां द्विगुणं कृत्वा ततो वर्गयित्वा[प० १०८, पा० २]पृच्छा(प्रस्था)पयेत् । तस्य च पृ(प्र)स्थापितस्य द्वे क्रिये भवतः । तत्रैका लेखाक्षरसंख्यापरिज्ञानक्रिया, द्वितीया च वर्गानयनक्रिया । तत्र तावले(ल्ले)खाख(क्ष)रस्य संख्या-क्रिया भण्यते–वर्गेये(र्गयि)त्वाऽऽद्यं स्थापितं प्राकृतप्रतिरास्य(श्या?) पंचपंचास(श)ता भागमपहाल

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

यल(ल्ल)ब्धं तत्पृथक् स्थापयेत् । तस्मिंश्च पृथक् स्थापिते पूर्वपिंडीकृत्य(ता)क्षरसंख्यां शोधयित्वा पंचपंचाशतभागावसि(शि)ष्टाश्च तत्रैव क्षिप्ता लेखाक्षरसंख्या भण्यन्ते ।

सो(सा)म्प्रतं कवर्गादिवर्गानयनक्रियोच्यते–तत्र पूर्ववर्गितं[प० १०९, पा० १]मवस्थापितं, तस्य पंचपंचाशता भागमपहृ(हा ?)त्य यल(ल्ल)ब्धं तत्पृथक् स्थापयित्वाऽवशिष्टस्य चाष्टभि- भा(र्भा)गेऽपहृते यल(ल्ल)भ्यते तद्वर्गककारादिपदमपरमवशिष्टं, तदपि ककारादिरेव वर्गः। यदा सर्वं शुद्ध्यति तदा स्वरो लभ्यते । अकारपृथक्स्थापितं यत्तत्सप्ताधिकं यदि भवति तत् स[प्त]भिरेव भाजितव्यम् । त(य)दा न सप्ताधिकं तद्भवति तदा तस्यापि ककारादिरेव वर्गः। एवं नामसंख्याप्रमाणेन अवर्गानू(नु)त्पादेय(दये)त् मतिमानिति ॥ २०२ ॥

॥ इति लेखगंडिकाधिकारः(रे) संख्याप्रमाणं [प० १०९, पा० २] समाप्तम् ॥

दिणपक्खमाससंवस्स(च्छ)रक्खरा जे हवंति बहुसंखा ।
तथ(प्प)इ सं[खा] गुणए, तस्स सनामा हवइ संखा ॥ २०३ ॥

क च ट त प य शाः – दिवसाः । ख छ ठ थ फ र षाः – पक्षाः । ग ज ड द व ल साः–मासाः। घ झ ढ ध भ व हाः – संवत्सराः । ङ ञ ण न माः – मासाः । दिनपक्षमाससंवत्सरान्यतमाक्षरबाहुल्ये प्रश्नेऽभिघातं शोधयित्वा ये(ये)षा[प० ११०, पा० १]मधिका संख्या दृश्यते तां गणयेत्। दिवससंज्ञा(ज्ञ)कवर्गस्याधिकसंख्यस्य दिवसैरेवावक्ति(धिः) भवतीति शुभाशुभफलादेशः कार्यः। एवं पक्षाक्षराणां, मासाक्षराणां, संवत्सराक्षराणां चाधिक्य(क्ये) संख्या वक्तव्येति ॥ २०३ ॥

सत्तम-णवमें य सरे, सुक्कदिणे पढम-ततियवग्गे य ।
बितिययवग्गे दसमे, सरे य पक्खो हवइ बहुले(लो) ॥ २०४ ॥

सप्तमस्वरेण एकारेण, नवमस्वरे[ण] तु उ(ओ)कारेण, क च ट त प य शा नां, ग ज ड द व ल सा नां उपरिगतेन केवलेन वा स्थापितेन शुक्लपक्षो भवति । द्वितीयो वर्गः–ख छ ठ थ फ र षाः, स्ते(तेन) उ(औ)कारेण च कृष्णपक्ष आदेश्यः ॥ २०४ ॥

अट्ठमसरंमि संवत्स(च्छ)रा ह वगे(ग्गे) य तह य चउत्थंमि ।
चरिमे धातुस्व(स)रेसु य, मासा अणुणासिये य तहा ॥ २०५ ॥

घ झ ढ ध भ व हा नामन्यतमाधिके प्रश्ने अष्टम[प० १११, पा० १]स्वरेण ऐकारेण युक्ते, एका- वा(एतेषा)मन्यतमाक्षरे केवले चैकारे यत्र यत्रावस्थिते यत्किंचित् पृच्छति तत् 'संवत्सरेण प्राप्यत'– इति वक्तव्यम् । बहुभिर्वा इति । चरिमाभ्यां सबिन्दु-विसर्गाभ्यां, च उ ज (उ ऊ अं ?), अनुनासिका ङ ञ ण न माः, एभिरष्टैर्मास्या(सा) आदेश्याः । पूर्वोक्तन्यायेनेति ॥ २०५ ॥

पढमे य सत्तमसरे, पाडिवओ होइ सुद्धपक्खस्स ।
कायक्खरेसु सत्तसु, बितियादी अट्ठमी जाव ॥ २०६ ॥ [प० १११, पा० २]

प्रथमस्वर अकारः । सप्तमस्वर एकारः । एतद्बहुले प्रश्ने शुक्लपक्षस्य प्रतिपद्भवति । ककार- बहुले प्रश्ने द्वितीया, चकारबहुले तृतीया, टकारबहुले चतुर्थी, तकारबहुले पंचमी, पकाराधिके षष्ठी, यकाराधिके सप्तमी, [शकाराधिके अष्टमी ।] एवं शुक्लपक्षस्य ॥ २०६ ॥

Ganesh Varni Digambar Jain Institute; Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

तइए णवमे य सरे, पाडिवओ [प० ११२, पा० १] होइ सुक्कपक्खस्स ।
गायक्खरेसु सत्तसु, णवमादी पुण्णिमा जाव ॥ २०७ ॥

तृतीयस्वर इकारः, नवमस्वर ओकारः। एतद्बहुले शुक्लपक्षस्य प्रतिपदा भवति। गकारबहुले प्रश्ने नवमी। जकारबहुले दशमी। डकारबहुले एकादसी(शी)। दकाराधिक्ये द्वादशी। धकाराधिके त्रयोदशी। लकाराधिके [प० ११२, पा० २] चतुर्दशी। सकारबहुले पूर्णमासी ॥ २०७ ॥

अट्ठम-बितिए य सरे, पाडिवओ होइ किण्हपक्खस्स ।
खादक्खरेसु सत्तसु, बितियादी अट्ठमी जाव ॥ २०८ ॥

द्वितीयस्वर आकारः। अष्टमस्वर ऐकारः। एतद्बहुले प्रश्ने कृष्णपक्षस्य प्रतिपद् भवति। खकाराधिके द्वितीया। छकाराधिके तृतीया। ठकाराधिके चतुर्थी। थकाराधिके पंचमी। फकाराधिके षष्ठी। रकाराधिके सप्तमी। षकाराधिके अष्टमी। तस्यैव कृष्णपक्षस्य ॥ २०८ ॥

दसम-चउत्थे य सरे, निदि(द्दि)ट्ठे तह य कण्हपाडिवओ ।
घादक्खरेसु सत्तसु, णवमादी [प० ११३, पा० १] सोलसी जाव ॥ २०९ ॥

दशमस्वर औकारः। चतुर्थः स्वर ईकारः। एतदधिके प्रश्ने कृष्णपक्षप्रतिपद् भवति। घकारबहुले नवमी। झकारबहुले दशमी। ढकारबहुले एकादशी। धकाराधिके द्वादशी। भकाराधिके त्रयोदशी। वकाराधिके चतुर्दशी। हकाराधिके अमावास्या। एतास्तस्यैव कृष्णपक्षस्य ॥२०९॥

पंचमवग्गे पंचम-सरे [य] एकादसी तहा होइ ।
अणुणासिएसु दोसु वि, सेसा तिहिणो य चत्तारि ॥ २१० ॥

पंचमो द्विस्वभावः। अतः उभयपक्षस्यापि शुक्ल-कृष्णाख्यस्य ग्राहको भवतीति। पंचमवर्गप्रतिबद्ध उकारस्त[प० ११३, पा० २]द्बहुले प्रश्ने उभयपक्षस्यापि पंचमी। औकाराधिके षष्ठी। ङकाराधिके सप्तमी। ञकाराधिके अष्टमी। णकाराधिके नवमी। नकाराधिके दशमी। मकारबहुले एकादशी। अकारः सानुस्वारः, तदधिके प्रश्ने द्वादशी च त्रयोदशी। अकारः सविसर्गः, तद्बहुले प्रश्ने चतुर्दशी पंचदशी चेति। एतास्त्रिवर्गा द्विस्वभावत्ता(त्वा)दक्षराणां पक्षद्वयस्य विज्ञेयाः ॥ २१० ॥

बितिया अणुणासाई, एवं तिहिणो कमेण चत्तारि ।
दिट्ठंमि कण्हपक्खे, एवं तिहिणो य(प)विभागो य ॥ २११ ॥

उक्तार्थे वा अतिदेशार्थकारिका। पूर्वार्द्धदृष्टे च कृष्णपक्षे शुक्लपक्षे च। एवमुक्तन्यायेन तिथीनां प्रविभागः कर्त्तव्यः ॥ २११ ॥

संवत्स(च्छ)रंमि दिट्ठे, बितिए वग्गंमि [प० ११४, पा० २] जाण हेमंत(तं) ।
तइयंमि गिम्हकालं, चउले(चउत्थए) पाउसं जाण ॥ २१२ ॥

संवत्सराक्षरे प्रश्नाक्षराणामादौ दृष्टे द्वितीयवर्गाक्षरे च तस्यानन्तरं अग्रतो दृष्टे हेमंतकालो द्रष्टव्यः। संवत्सराक्षराः—घ झ ढ ध भ व हाः, द्वितीयवर्गाक्षराश्च—ख छ ठ थ फ र षाः। तस्य

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

संवत्सराक्षरस्य प्रश्नाक्षराणामादौ स्थितस्य यदा ग ज ड द ब ल सा नामन्यतमाक्षरोऽनन्तरमेवाग्रतो दृश्यते तदा ग्रीष्मकाल आदेश्यः । तस्य संवत्सराक्षरस्य आदौ स्थितस्य यदा घ झ ढ ध भ व हा नामन्यतमाक्षरो दृश्यते तदा प्रावृट्कालो वाच्यः ॥ २१२ ॥

पंचमयंमि य वरिसा, वसंतकालं च पढमकादीसु ।
आयक्खरेसु पंचसु, सरओ सेसेसु चड(उ)त्थं पि ॥ २१३ ॥

तस्यैव संवत्सराक्षरस्य, प्रश्नाक्षराणामाद्यस्य [प० ११५, पा० २] ङ ञ ण न मा[ना]मन्यतमाक्षरो यदाऽनन्तरमेवाग्रतो दृश्यते तदा वर्षाकालो(लः) । तस्यैव संवत्सराक्षरस्य प्रश्नाक्षराणामाद्यस्य अ ए क च ट इत्येतेषां पञ्चाना[म]नन्तरमेवाग्रतो दृश्यते तदा वसन्तकालो(लः) आदेश्यः । तस्यैव संवत्सराक्षरस्य प्रश्नाद्यक्षराणामाद्यस्य त प य भा(शा?) इत्येतेषां चतुर्णां केचिन्मन्यते न द्वाभ्यां यकार-स(श)काराभ्यां तदा प्रथमपंचके 'अ-ए' स्वरद्वयं न गण्यते । क च ट त प इत्येते तद् गण्यन्ते । एषां यदाऽनं[प० ११६, पा० १]तरमेवान्यतमाक्षरो दृश्यते तदा शरत्काल आदेश्यः । पौष-माघौ हेमन्तः । फाल्गुन-चैत्रौ वसन्तः । वैशाख-ज्येष्ठौ ग्रीष्मः । आषाढ-श्रावणौ प्रावृट्कालः । भाद्रपद-अश्वयुजौ वर्षाकालः । कार्त्तिक-मार्गशीर्षौ शरत् । एवं क्रमः । गाथाबंधानुलोमतया यथा तथोक्तः ॥ २१३ ॥

पढमस्स पढमतइए, फग्गू चित्तो य दोसु चाईसु ।
दोस(सु) य कत्तियमासो, मग्गसिरो दोसु चरिमेसु ॥ २१४ ॥

प्रथमवर्गस्य प्रथम-द्वितीय-तृतीये च [प० ११६, पा० २] अ-ए-क फाल्गुनः । प्रश्नादौ व्यवस्थितैरि(क्ष)त्वक्षरैरनन्तरोक्तानां त्रयाणां मासाक्षराणामन्यतमो यदा दृश्यते तदा फाल्गुनो मासः । एवं क्रमेण चकार-टकारौ चैत्रः । तकार-पकारौ कार्त्तिकः । य-स(श) मार्गशीर्षः ॥ २१४ ॥

एमेव सेसयाणं, उडुवग्गाणं पंच चउरो(त्था) य ।
मासक्खरा उ कमसो, पोसादी जाव अस्सजुज्जो(जो) ॥ २१५ ॥

आ ऐ ख छ ठ पौषः । थ फ र ष माघः । इ ओ ग ज ड वैशाखः । द ब ल स ज्येष्ठः । ई औ घ झ ढ आषाढः । ध भ व ह श्रावणः । [प० ११७, पा० १] उ ङ ञ ण भाद्रपदः । न म अं अः अश्वयुजः । एवं पौषादिरश्वयुजपर्यवसा[न]मिति । तत्र चतुर्थवर्गाक्षरा ये च वत्सरअ(रा)क्षराः । पंचमवर्गाक्षराः ङ ञ ण न मा मासाक्षराः । ते मासाक्षराः संवत्सराक्षराणामुपरिगता अग्रतो वा व्यवस्थितानां दहंति । दग्धेषु तेषु वर्णाक्षरा मासाक्षरा भवन्ति । तैर्मासादेशः कार्यः । अश्वयुजमासादारभ्य वर्षप्रवृत्तिः, समाप्तिश्च तस्य भाद्रपदमासे । एवं मासक्रमः उक्तः । अनेन लाभालाभ[प० ११७, पा० २]-सुखदुःख-गमनागमन-जीवितमरण-नष्टजातकादिषु संख्यया लब्धया प्रश्नाक्षरैः काल आदेश्यः सुसमाहितेन निमित्ते(त्त)ज्ञानवं(व)तेति ॥ २१५ ॥

॥ कालप्रकरणं समाप्तम् ॥

लाभट्ठि(ट्ठि)यस्स लाभं, वदिज्ज जइ उत्तरा हु अणभिहया ।
अहरेसु णत्थि लाहो, जे वि[य] अहराहरा चउरो ॥ २१६ ॥

Ganesh Varni Digambar Jain Institute, Nana, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[प० ११८, पा० १] अनभिहतोत्तराक्षरबहुले प्रश्ने प्रष्टुला(र्ला)भ आदेश्यः । अधराक्षराधिके नास्ति लाभः । येऽपि चाधराधरा[ः] चत्वारः स्वराः प्रागुक्ता[ः] तेऽप्यलाभकराः । 'आ ई ऐ औ' एतेष्वधिकेषु लाभो नास्तीति ॥ २१६ ॥

लब्भइ लहं(हुं) सजोणुत्तरेसु[प]रजोणि उत्तरे लाभं ।
लब्भइ विलंबियकाले, सपरिके(क्के)सं [प० ११८, पा० २] अहएसु ॥२१७॥

उत्तरजीवाक्षरबहुले प्रश्ने अभिप्रेतमर्थ(र्थं) क्षिप्रं लभते स्वजना[त्], तैरेव जीवाक्षरैरधिकेषु प्रश्ने उत्तरधात्वक्षरमिश्रेषु उत्तरमूलाक्षरमिश्रेषु वा परश(स)काशाल्लाभो वाच्यं(च्यः) । एषामेव जीवधातु-मूलाक्षरा[णा]मुत्तराणामधिकानां आलिंगिताभिधूमितानां चिरात् परिक्लेशेन वाऽभिप्रेतार्थमर्थं प्राप्नोति । यतः क्व(कु)तश्चिद(द)ग्धेनैवास्ति लाभ इति ॥ २१७ ॥

जह चेव य अभिघाते, तह चेव य उत्तराहरेसुं पि ।
धातुस्सरा य चरिमा, [प० ११९, पा० १] सभावदीहा य अहरहरा ॥२१८॥

शुभाशुभं पृच्छतः अभिघातरा(ता)लिंगिताभिधूमितदग्धलक्षण उत्तराक्षरेणाधरेण आलिंगितो(ते) उत्कृष्टात् सकाशादल्पक्लेशो भवति । प्रष्टुः उत्तराक्षरेणाधरो(रा)क्षरेणाभिधूमिते सत्युत्कृष्टात् सकाशान्मध्यमक्लेशो भवति । प्रष्टुः उत्तराक्षरेणाधरो(रा)क्षरे दग्धे सत्युत्कृष्टात् सकाशान्महाक्लेशो भवति । अधराक्षरेणोत्तराक्षरे आलिंगिते धर्मादल्पदुःखमवाप्नोति । अधराक्षरेणोत्तराक्षरे अभिधूमिते धर्मं(र्मात्?)मध्यमं दुःखमवा[प० ११९, पा० २]प्नोति । अधराक्षरेण उत्तराक्षरे दग्धे धर्मान्मह[द्]दुःखमवाप्नोति । एवं शुभाशुभं पृच्छतो वाच्यम् । धातुस्वरौ द्वौ 'उ ऊ', चरिमौ 'अं अः', ङ ञ ण न माः । स्वभावदीर्घास्त्रयः स्वराः 'ई ऐ औ' । इत्येतेषां मध्ये 'ई औ' अधराधरो(रौ) चतुर्थवर्गप्रतिबद्धत्वात् । एते दाह्या दहन्ति, न लाभं कुर्वन्त्यधिकाः प्रश्ने । दाह्य(ह्या)श्च पूर्वोक्ता एव ॥ २१८ ॥

अहरेसु अत्थि लाहो, जइ उत्तरवंजणेण अणुवलिओ ।
अहरबलाणुबलेणं, पुणो(?) भणिज्ज लाभं तु णत्थि त्ति ॥ २१९ ॥

अह(ध)रेषु लाभः प्रतिबद्धः अपि वादार्थं भवत्यधरेषु लाभो यद्यु[प० १२०, पा० १]त्तरेष्वनुवलिता भवन्ति । यदा त्वधराः अधरानुवलास्ता(स्त)दा नास्त्येव लाभ इति ॥ २१९ ॥

जइ अक्खरअणभिहया, पण्हे दंसीति उत्तरा लहुआ ।
तो भणसु रायलाभं, अहराहरसंजुए णत्थि ॥ २२० ॥

प्रश्नायां उत्तराः लघवः जीवाक्षराः अनभिहता शुद्धा यदा बहवः, तदा क्षत्रियस्य राज्यार्थिनो राज्यलाभः । शेषवर्णानां यथास्वमर्थलाभो वाच्यः । योनिधि(वि)शेषाबाक्षराणां तथा देश्यम् । 'अधराधर' इति अधरैः अधरस्वरयुक्तैर्नास्ति लाभ इति प्रागुक्तमेवेति ॥ २२० ॥

लाभंमि पढमदिट्ठे, [प० १२०, पा० २] तिविहं कालं तु निदिसे तस्स ।
अतिगतमेस्सं वट्टन्त पंचवग्गाणुमाणेणं ॥ २२१ ॥

लाभाधिकार एवायम्—लाभे प्रथमं दृष्टे त्व(त्रि)विधे कालमतीतमनागतं वर्त्तमानं च । वर्गाणां परिणामेन निर्दिशेदित्येतत्सूत्रमुपरि गाथा(थ)या व्याख्यास्यति ॥ २२१ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

पढमतइया हु वग्गा, वट्टंते वितईअ(बियई)ओ अईअंमि ।
सेसा दोन्नि वि वग्गा, कालंमि अगामिय(य आगमि)स्संमि ॥ २२२ ॥

प्रथमवर्गाक्षरा[प० १२१, पा० १]णां क च ट त प य श ा नाम्, तृतीयवर्गाक्षराणां ग ज ड द ब ल सा नाम्, अन्यतमाधिके प्रश्ने वर्तमानकालमवगच्छ । द्वितीयवर्गाक्षराणां ख छ ठ थ फ र षा णामन्यतमाधिके अतीतकालवमगच्छ । शेषवर्गाक्षराणां घ झ ढ ध भ व हा नाम्, ङ ञ ण न मा नां चान्यतमाधिके भविष्यत्कालमवगच्छ । यदुक्तं वर्तमानकालाधिके प्रश्ने प्रष्टुव(र्व)र्तमानकालो(ले) लाभः । अतीताक्षर[प० १२१, पा० २]बहुले प्रश्ने आसीला(? अतीतात्ला)भः । भविष्यत्कालाधिके प्रश्ने भविष्यति लाभः ॥ २२२ ॥

जा जस्स पुव्वभणिया, जोणी तस्सक्खराइ लक्खेज्जा ।
तस्सेव वदे लाभं, वा पाविय णिद्दिसे तेणं ॥ २२३ ॥

या यस्य जीव-धातुमूलानां योनिरुक्ता तस्यास्त्रिविधाया यौ (योनेः) प्रश्नाक्षराणां मध्ये यदा जीवाक्षरा अधिका भवंति तदा जीवं लभ्यत इति [प० १२२, पा० १]प्रष्टावा(ष्टुर्वा)च्यम् । द्विपद-चतुष्पदस्य वा अक्षरानुमानेन पूर्वोक्तक्रमेणैव ज्ञेयम् । एवं धा(तु)त्वक्षरा यदा बहव[ः] तदा धातुं प्राप्स(प्स्य)तीति प्रष्टुवा(र्वा)च्यः । यदा मूलाधिकः, तदा मूलद्रव्यमवाप्नोतीति वक्तव्यम् ॥ २२३ ॥

तदा वक्तव्य इति गाथान्तरेणाह –

पण्हक्खरेसु पढमो, जारिसओ उद्दिसिज्ज जीवाई ।
तारिसयस्स य लाभो, दायाति य [प० १२२, पा० २] णिद्दिसे तेणं ॥ २२४ ॥

उक्तार्थैव गाथा ॥ २२४ ॥

पढमाइ बंभणाणं, बीओ वग्गो हवइ वेसाणं ।
तइओ य खत्तियाणं, सुद्दाणं सेसया दोण्णि ॥ २२५ ॥

प्रथमवर्गाक्षराणां क च ट त प य श ा नां अन्यतमाधिके प्रश्ने ब्राह्मणसकाशालाभो(ल्लाभ) आदेश्यः । द्वितीयवर्गाक्षराणां ख छ ठ थ फ र ष ा णां अन्यतमाधिके प्रश्ने वैश्याला(ल्ला)भो वक्तव्यः । तृतीयवर्गाक्षरा[णां] ग ज ड द ब ल सा नामन्यतमाधिके प्रश्ने क्षत्रियाला(ल्ला)भो वक्तव्यः । शेषवर्गाणां घ झ ढ ध भ व हानां बाहुल्ये तदा शूद्रा[त्] लाभो वक्तव्य [प० १२३, पा० १] इति । ङ ञ ण न मा [नां] अन्यतमबहुले संकरजातीयाला(ल्ला)भ इति । अस्यैव जातीयका उक्ता उक्तं च द्रष्टव्यम् ॥ २२५ ॥

अथे(प्पे)वि यणभिहया, वण्णिया (ग्गिय ?) वग्गा(ण्णा ?)सवग्गसंजुत्ता ।
अभिहयपरसंजुत्ता, णीया (णय) हीणाहियसमा भणिया ॥ २२६ ॥

अनभिहताः सर्ववर्णाक्षराः तावलिं(ल्लिं)गो भवति । तैः प्रश्नाधिके लाभो भवति । ये परपा(स्प)रमभिघ्नन्ति । क च ट त प य शा[स्तै]रुपरिगतैः, घ झ ढ ध भ व हा नां च ग ज ड द ब ल सै

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public.Domain. Digitized by Sarayu Trust/eGangotri

रुपरिगतैभ(र्भ)वति । स्व[व]र्गसंयोगः । तद्बहुले प्रश्ने लाभो भवति । ये परस्परमभिघ्नंति । स चाभि[प० १२३, पा० २]घातस्त्रिविधः । आलिंगितादिकः पूर्वोक्तः । योऽसौ घ्नता तदभिघातेन वम्मा(र्गाः?) कदाचित्संख्यया हीना[ः] कदाचिर(द)धिका[ः] कदाचित्समा भवति(न्ति) । एकै-(ते?)न अभिम(ह)न्यंते(?) । हीने(?) फललाभ[ः] प्रश्ने समे ईषत्फलं भवति । दृष्टैरधिकैस्व(श्च) फलाभावः । एवमेति(भिः) शुद्धशेषैः शुभाशुभमध्यमादेश्यम् ॥ २२६ ॥

पढम-तइज्ज(ज्जे) वग्गे, होइ [प० १२४, पा० १] सुही दुक्खिऔं बी[य]-चउत्थे ।
पंचमए पुण वग्गे, सुह-दुक्खे(क्खं) मज्झिमं तस्स ॥ २२७ ॥

प्रथमवर्गः—क च ट त प य शाः । तृतीयो वर्गः—ग ज ड द ब ल साः । एषामक्षराणां बाहुल्ये सुखविवक्षायां प्रष्टु[ः] सुखलाभो भविष्यति सुखावान्ति(प्ति)रित्यर्थः । द्वितीयवर्गः—ख छ ठ थ फ र षाः । चतुर्थो—घ झ ढ ध भ व हाः । रे(ए)तेषां अक्षराणां बाहुल्ये प्रष्टादु(ष्टुरु)त्पातो [प० १२४, पा० २] ज्ञेयः । दु(उ)त्पा[ता]गमो वा भविष्यतीति । पंचमवर्गो—ङ ञ ण न माः । तेषु च [सुख]दुःखं मध्यममवाप्नोति । एवमसौ सुख-दुःखी (खानि?) वा तत्राप्ये(प्नो)ति येवं(एवं) वाच्यम् ॥२२७॥

बीय-चउत्था वग्गा, दिट्ठा इच्छंति सुबहु आउं [च] ।
पंचमओ पुण वग्गो, मभि(ज्झि)मआउं सया इच्छे ॥ २२८ ॥

द्वितीयवर्गः—ख छ ठ थ फ र षाः । चतुर्थः—घ झ ढ ध[प० १२५, पा० १]भ व हाः । एतेषाम-क्षराणां बाहुल्ये आयु[ः] पृच्छतः, आयु[ः] प्रच्छु(भू)तं वक्तव्यम् । फलं लाभादिकं पृच्छति(तः) अल्पं वक्तव्यम् । पंचमवर्गाक्षरा[णां]—ङ ञ ण न मा नां बाहुल्ये मध्यमायुः पृच्छकस्य, लाभप्रश्ने मध्यमो लाभो वाच्यः ॥ २२८ ॥

उत्तरसरसंयु(जु)त्ता, सव्वे अप्पाउआ फलमुवेंति । [प० १२५, पा० २]
अहरस्सरसंजुत्ता, तुह (?सुबहुं) इ(य)च्छंति ते आउं ॥ २२९ ॥

उत्तरस्वराः पूर्वोक्तास्तैः संयुक्ता उत्तराक्षराः प्रथम-तृतीयवर्गीयाः । तद्बहुले प्रश्ने यदि लाभादिकं फलं पृच्छति तेषां प्रभूतं फलं भवति । येऽप्यायुः पृच्छंति तेषामल्पमायुर्भवति(ती)-त्यादेश्यम् । त एवाधिका उत्तराक्षरा अधरस्वरयुक्ता आयुःप्रश्ने प्रभूतमायुः प्रयच्छंति । फल-प्रश्ने फलं चाल्पं लाभादिकमिति ॥ २२९ ॥

अहव विसण्णो आयुंमि होइ सुद्धेसु काइमाईसु ।
सत्तण्ह मेसममा(वसा?)दि सरसंजुत्तेसु विवज्जासो ॥ २३० ॥

पंचवर्गन्यायेन स(सा)मान्यतः फलं पृच्छकस्यायु[प० १२६, पा० १]श्चोक्त[म्] । अष्ट-वर्गन्यायेन लग्नमुत्पाद्य आयुर्विभागो नष्टविभागो नष्टजातकमिति वक्तव्यमिति । काद्यादि-सप्तवर्गेषु शुद्धेषु मेषादिराशयः । सप्त कथं ? । प्रश्नाक्षरं गृह्य आद्यक्षरं त्यक्त्वा द्वितीये ‘क च ट त प य शा’द्या(दि)वर्गाक्षराणां वर्गान्यतमं शुद्धमात्रारहितं यद् वर्गमध्यं याति दृष्टं स रासि(शि)-रुदयादिः । तत्र च वर्गे यदि (यत?)मो वर्ण[ः] तति लिप्ता(कला?) शोध्या । षडंस(श)को वर्णः । वर्णे षट्कलाः सो(शो)ध्याः । भुज्यमानस्य वर्णप्रमाणेन षट्‌कलाः शोध्याः । षड्(ष्ठव?)र्गस्य पंचमो रेफः, स-

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

[प्तम]वर्गस्य क्षकारः, य ए त ट च [प० १२६, पा० २]वर्गाश्च वृश्चिकादिकाः । एते स्वराः संतस्तथैव कुर्वन्ति । एवं स्वरयुक्ता आद्यंतत्यागेन [वि?] पर्ययो द्रष्टव्यः । एवं वर्ग(र्ते?)मानं लग्नं प्रश्नाक्षरैरुत्पाद्यते । ततः सिद्धाक्ष[र]राशिरुत्पद्य(त्पाद्य?) । कथं द्वादश स्वरा द्विगुणीकृत्यास्थाप्याकाशप्रश्नया दशकसंख्यया निव्यया गुण्य जातं शतद्वयं चत्वारिंश[प० १२७, पा० १]त्यधिकं सिद्धरासि(शिं) स्थाप्य प्रश्नागतलग्नांशा[न्] विशोध्य शेषभागं ककारगर्भेण कादिवर्गाष्टकगुणेन लब्धं एकान्ते स्थाप्य, रूपमेकं शेषवर्णांकानां यथादृष्टां(ष्टं) स्थाप्य, षष्टिच्छेदं वाऽवस्थाप्य, उपरिवर्णराशिसवर्ण्ये(?) षष्टिपंचभिगु(र्गु)ण्यं तेन भागोपरि राशे[ः] लब्धानि वर्षाणि । शेषं स्वरगुणं लब्धा मासा[ः] चाक्षरद्वयगर्भगुणे दिनानि । 'क च ट त' चतुरक्षरवर्गगुणे [प० १२७, पा० २] घटिकाः । एतद्वर्षादिक्रमेण स्थाप्य ककारगर्भषड्वर्गगुणाद्विशोध्य पृच्छकस्य प्रथम-मध्यम-तृतीयावस्थां विजा(ज्ञा)य धात्वादित्र्यंबं देयम् । विसो वा अष्टवर्गो ये आद्यन्तपाते षड्वर्गक्षेपोपवतो वा तृतीयदसा(शा)यां 'अ ए क च ट त प य श' वर्गं शोध्यं वाऽव(प)नीयं वा । एवमावृत्त्या यावत्ति(न्नि?)श्चित्तकाल इति । यावंतस्व(श्च) पर्याया धात्वादि[प० १२८, पा० १]त्र(त्रि)कस्य बलाद्यवस्थासु शुध्यति(न्ति) प्रक्षिप्यन्ते वा ... गवद्वर्णक्षेपादयोऽप्यसाधाद्योवण्ण(?)सावपि बुद्ध्या पात्यो देयो वा । एवं पृच्छकस्यातीतः कालः स्फुटः । आगामिकालपरिज्ञानार्थं य एषः अति(ती)तकालः, एषः चतुष्टयगुणाकारः, गर्भाद्विसो(शो)ध्य वर्षादि । इदानीं तस्माद्याव(ती) दसा(शा) विभागांसा(शा) प[त]ति तावति(ती) इह क्षेत्राक्षिप्तेषु पात्या । [प० १२८, पा० २] इह शेषमार्गादिवर्गादिस(ग)ण उभययोगे सर्वे(र्व) वर्णाग्रमिति (?) ॥ २३० ॥

आउंमि जो वियप्पो, काले देसे य होइ सो चेव ।
अणुणासिया य सवे, चरिमा सेसा समा भणिया ॥ २३१ ॥

आयुषि यः क्रमोऽभिहितः स एव कालो(ले) वक्तव्यः । उत्तराक्षरैरधिकैः क्षिप्रं ल[प्स्य]तीति वक्तव्यम् । अधराक्षरैरुत्तराक्षरान(नु?)लितैः, दृष्टि(ष्टै)रधिकैः स्व(चि?)रेण प्राप्स्यतीति प्रश्ने वाच्यः । देसो(शो) ग्राम-विषयादिलक्षणः । ग्रामादिकस्य लाभो भवतीति प्रश्ने उत्तराक्षरैरधिकैर्लब्धैः [क्षिप्रं] अधराक्षरैश्चोत्तरानुवलितैः [प० १२९, पा० १] स्व[चि?]रेण लाभः । अधराक्षरैश्चाधिकैर्नास्ति लाभः । अनुनासिकाश्चरिमसंज्ञास्तैः समो लाभः स्वयोनिगुणतुल्य इति ॥ २३१ ॥

॥ लाभगंडिकाप्रकरणं समाप्तम् ॥

इत(तइ)य-पढमेसु य जलं, बीय-चउत्थेसु अप्पपाणीयं ।
पंचमए पुण वग्गे, णत्थि जलं चेव णायवं ॥ २३२ ॥

प्रथमवर्ग-तृतीयवर्गाक्षराधिके प्रश्ने नास्ति जलमादेश्यम् । या मात्रा [ः ?] स्ववर्गप्रतिबद्धाः ताभिरप्येवमेवेति ॥ २३२ ॥

पढम-तइएसु [पर]मा, बितिए मज्झा उ सस्ससंपत्ती ।
चउ-पंचमए आयरिए (?) णत्थि सस्सं ते(ति) जाणेज्जा ॥ २३३ ॥

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

प्रथम-तृतीय[प॰ १२९, पा॰ २]वर्गाक्षराधिके सस्यनिष्पत्तिः उत्कृष्टा । द्वितीयवर्गाक्षराधिके मध्यमा सस्यनिष्पत्तिः । चतुर्थवर्गाक्षराधिके स्तोकं निष्पद्यते । पंचमवर्गाक्षराधिके स्तोकमपि नास्ति सस्यम् ॥ २३३ ॥

पढम-तइयंमि वग्गे, सइत्तणं तह य बीयए असई ।
चउत्थ-पंचमए वग्गंमि(ग्गे) णत्थि सइ चिय णायव्वा ॥ २३४ ॥

प्रथम-तृतीयवर्गाक्षराधिके प्रश्ने महती सती ज्ञेया । द्वितीयवर्गाक्षराधिके प्रश्ने मध्यमा सती ज्ञेया । चतुर्थ-पंचमवर्गाक्षराधिके प्रश्ने सतीरेव नास्तीति निष्पत्त्यभावात् ॥ २३४ ॥

॥ वर्गस्य [प॰ १३०, पा॰ १] गंडिका समाप्ता ॥

आदा पुस्सो [य] महा, हत्थो चित्ता तहेव [साई य] ।
जिट्ठा [मू]लो एए, इ(दु)अक्खरा अट्ठ नक्खत्ता ॥ २३५ ॥

आर्द्रा-पुष्य-मघा-हस्त-चित्रा-स्वाति-ज्येष्ठा-मूला अष्टौ रे(द्व्य)क्षराणि नक्षत्राणि ज्ञातव्यानि ॥

अस्सिणि भरणि तह(य) कित्तिय, रोहिणि फणिदेवया विसाहा य ।
रेवय सवण धणिट्ठा, तिअक(क्ख)रा णव उ नक्खत्ता ॥ २३६ ॥

अश्विनी-भरणि-कृत्तिका-रोहिणी-अश्लेषा-[विशाखा]-श्रवण-धरि(नि)ष्ठा-रेवत्य इति नवनक्षत्राणि अ(त्र्य)क्षराणीति ॥ २३६ ॥[प॰ १३०, पा॰ २]

मिगसिर पुणव(व्व)सु बिन्नि, पुव्वासाढाणुराधजलदेवा ।
एए पंच वि र(रि)क्खा, चउरक्खरनामया भणिया ॥ २३७ ॥

मृगसि(शि)रः पुनर्वसुः पूर्वाषाढा अनुराधा शतभिषा एतानि पंच नक्षत्राणि [चतुरक्षरनामकानि भणितानी]ति ॥ २३७ ॥

भृगदेवा दगदेवा, रिक्खा पंचक्खरा दुवे एते ।
अष्ट(ज्ज)म-विस्सा छक्कं, सत्तक्खवि(रि)याहिबुद्धी(बन्धु?)या ॥ २३८ ॥

पूर्वाफाल्गुनी उत्तराषाढा द्वे एते उभाव(भेऽ)पि पंचाक्षरौ(रे) । अर्यमदेवता—उत्तराफाल्गुनी, विश्वदेवता—पूर्वाभाद्रपदौ एतौ षडक्षरौ । अहिबन्धुः उत्तराभाद्रपदा सप्ताक्षरा ॥ २३८ ॥

दो[अ]क्खरमादीणं, णक्खत्तग(त्ता?)णं [कमेण ?] ठावेउं[1] ।
पण्हाइमसंखाए, [प॰ १३१, पा॰ १] णक्खत्तगणं वियाणाहि ॥ २३९ ॥

द्व्यक्षरादीनां नक्षत्राणां सरा(प्ता)क्षरपर्यन्तानां क्रमेण स्थापयित्वा प्रश्नाक्षराणां आद्यक्षरसंख्ययाऽभिघातशुद्धा नक्षत्रगणमध्या नक्षत्रगणं जानीहि । द्व्यक्षरं त्र्यक्षरं चतुरक्षरं पंचाक्षरं षडक्षरं सप्ताक्षरं चेति ॥ २३९ ॥

---

1 "गण ठावे वेउवे" इति आदर्शे भ्रष्टपाठः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अधरुत्तरक्कमेणं, पच्छा अहरुत्तरेण सट्ठाणं ।
णादुण(दूणं?) तवणामं, जाणेज्जा णामकरणाणं ॥ २४० ॥

अधरा उक्ताः, उत्तरा अप्युक्ता एव । प्रश्नाक्षराणामाद्यवस्थितो(तेन?) उत्तराक्षरणर(रेणा)ल्पसंख्या(ख्यं) नक्षत्रं ज्ञेयम् । प्रश्नाक्षराणागा(मा)दिस्थितेन अधराक्षरेण बहुसंख्यं नक्षत्रं ज्ञेयम् । [प० १३१, पा० २] प्रश्नाक्षरैना(र्ना)माक्षरैर्वा पूर्वोक्ते[न] क्रमेण वर्गमानीय तेषामुत्तराक्षरैरुत्तराक्षरा लभ्यन्ते । अधराक्षरैरधराक्षरा लब्धवर्गा[:] प्रतिलब्धा[:] प्राप्यन्ते । तैर्नक्षत्रं योजयेदिति । अत एव अधररासि(शि)रपि ज्ञेया ॥ २४० ॥

॥ नक्षत्रगंडिका समाप्ता ॥

तिहि उत्तरेहि वग्गं, उत्तरवग्गेसु [प० १३२, पा० १] पढमयं लहइ ।
तिहि अधरेहिं अधरं, अधरेसु(सुं) य तिजयं लहइ ॥ २४१ ॥

प्रश्नाक्षराणामादौ यदा त्रयोऽक्षरा उत्तरा मात्राभिरभिहता (मात्रारहिताः?) असंयुक्ता अनभिहताश्च भवंति तदा तेषां य आ[दि]स्वर(रः) स आत्मीयं वर्गं लभते । प्रश्नाक्षराणामादौ यदा त्रयोऽक्षरा अधरा मात्रारहिता [प० १३२, पा० २] असंयुक्ता अनभिहताश्च भवंति तदा तेषां यस्तृतीयोऽक्षरः [स] आत्मीयं वर्गं लभते ॥ २४१ ॥

उभएसुं दोसुं दोण्णि वि एक्केक्कं चउक्कयं लहइ ।
वामिस्सेसु वि एक्कं, पुरिमेसु अणंतरं लहइ ॥ २४२ ॥

प्रश्नाक्षराणामादौ यदा द्वौ उत्तराक्षरौ भवतः मात्रारहितौ असंयुक्तौ अनभिहतौ च तदौ(दा) तौ द्वावपि प्रत्येकं आत्मीयं[1] वर्गं [प० १३३, पा० १] लभते । प्रश्नाक्षराणामादौ यदा द्वौ अधराक्षरौ मात्रारहितौ असंयुक्तौ अनभिहतौ च प्रत्येकं आत्मीयं वर्गं लभते । यदा अधरा(र आ)दौ पतितोऽनन्तरश्च त्य(त)स्योत्तरः पतितः । य(त?)दाऽऽलिंगिताभिधूसितदग्ध-लक्षणं अभिघातं सो(शो)धयेद(द्) । निदर्शनम् – खकारस्य गकारेणालिंगितस्यैका संख्या ह्रसति । ह्रसितैकसंख्या[क]श्च ककारो [प० १३३, पा० २] भवति । तस्मिन् ककाराच(रश्च)तुर्थवर्गस्तद्वर्गं लभते । उत्तरानुवलितत्वात्तमर्थं उत्तरं लभते । स एव खकार(रो)घकारेणाग्रतोऽवस्थितेनाभिधूम्यन्ते(ते) । अभिधूमितस्य चकारस्य द्वे संख्ये निवर्त्तेते । एका खकारसंख्या, द्वितीया ककारसंख्या । तत्रैकस्थाने(न)त्यागेन खकार-चकारादारभ्य चतुर्थपवर्गमाप्नोति । स चा(च) धकारानुवलितत्वात् पवर्गं अधराक्षरं प्राप्नोति । यदा अध[र] आदौ पतितोऽनंतरश्च तस्योत्तरः पति[तः], तदाऽऽलिंगिताभिधूमितदग्धलक्षणं अभिघातं शोधये[दि]ति । [प० १३४, पा० १] निदर्शनम्—खकारस्य द्वे ककारस्य डकारे[ण] चोत्तरेण दग्धस्य तिस्रः संख्या निवर्तन्ते । कास्तास्तिस्रः संख्याः ? खकारस्य संख्या द्वे वेति । स्थानद्वयह्रसस्य डकारादारभ्य चतुर्थवर्गं प्राप्नोति । कः पुन[र]सौ चतुर्थस्तत्रोत्तरानुवलितत्वात् पवर्गरुत्तराक्षरा(रं?)प्राप्नोति । एवं एको(के?)न चतुर्थस्य उक्तः ।

1 'आत्मायं पवर्गभं' इति प्रतिगतः पाठः ।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अन्येषामप्यक्षराणां एवमेव क्रमो ज्ञेयः। व्यामिश्रास्तु संयुक्ताक्षराणां यत्र यत्र पतिता आत्मवर्गं लभते(न्ते)। तेषां संयुक्ताक्षराणां क आत्मवर्गं लभते? किं योऽधस्तात् आहोश्विदुपरिष्ट(ष्टः?)। [प० १३४, पा० २] उच्यते—योऽसायु(वु)पया(र्ये)क्षरः। प्रश्ने पूर्वाक्षरौ यदा द्वावुत्तरौ भवतः, मात्रारहितौ असंयुक्तौ चेति। तदा द्वितीयोऽक्षर आत्मीयं वर्गं लभते ॥ २४२ ॥

अ च त य वग्गा उत्तर-करणं च हवदि [जइ?] चउ व[ग्ग]स्स।
होदि कमेण क ट प शा, चदुरा णीपं(यं) च णादव्वं ॥ २४३ ॥

'अ च त या'नां चतुर्णामक्षराणां बाहुल्ये(ल्यं) यदा प्रश्ने भवि(व)त्यमिहि(ह)तानां तदा चिंतायां उत्तमकार्यं पृच्छतीत्यादेश्यम्। लाभप्रश्ने उत्तमो भवतीति वाच्यम्(?च्यः) अ(प्र?)ष्टा। 'क ट प शा'नां चतुर्णामक्षरा[प० १३५, पा० १]णां प्राचुर्यं यदा प्रश्नाक्षरेषु दृश्यते अनभिहतानां तदा चिंतायां नीचकार्यं पृच्छतीति वक्तव्यम् प्रष्टा। लाभप्रश्नेऽल्पलाभस्ते भविष्यतीति वक्तव्यम्। 'अ च त या' उत्तरकरणसंज्ञकम्। 'क ट प शा' अधरकरणसंज्ञम् ॥ २४३ ॥

संजुत्तमसंजुत्तं, आलिंगियमादियं अ क च टा दी।
उच्चारिज्जदि कमसो, अणुपुव्वीए करणमेदं ॥ २४४ ॥

प्रश्ने येऽक्षरास्ते संयुक्ता [असंयुक्ता] वा आलिंगिता [अ]भिधूमिता दग्धा वा, अ क च ट त प [य] शा येऽक्षराः पंचचत्वारिंशत् [प० १३५, पा० २] तेषां क्रमोच्चारणं आनुपूर्वीति भण्यन्ते(ते)। आनुपूर्वीक्रम उच्यते। 'अ क च टा'दीनामष्टानां वर्गाणां क्रमोच्चारणं आनुपूर्वीक्रम उच्यते। विपर्यासोच्चारणं अनानुपूर्वीकरणमिति। एतावानेव, नात्र कश्चिद् विशेषः। प्राप्तिस्तु वर्गाणां अन्यतःका(०न्यका०?) रिकयोच्यते ॥ २४४ ॥

[पढ]अं(मं?)तिल्लचउक्के त प य श वग्गे वि पावए जेण।
एवं अना[णु]पुव्वीकरणं छट्ठं मुणेयव्वं ॥ २४५ ॥

प्रथमवर्गस्य 'अ क[प० १३६, पा० १]च ट त प य शा'ख्यस्य अन्य(न्त्या)क्षराश्चत्वारः 'त प य शा' एते यथा प्राप्नुवंति वर्गाणां तथा वर्णइ(यि)ष्याम्युपरिष्टा[त्]। यत्र तद्वर्गः(र्गाः) विलोम्येन अनानुपूर्व्या प्राप्नुवंति। वर्गाः—कवर्गः चवर्गः टवर्गः शवर्ग सि(इ)ति। अनानुपूर्व्या षष्ठं करणं ज्ञेयमिति। अ क च ट त प य शा इत्यत्र पूर्वाः—'त प य शा' इत्येवानुपूर्वीक्रम इत्यर्थः। एषामेव विपर्ययोच्चारणं अन्योन्य(०नानु)पूर्वी [क्रमः]। प्राप्ति(पश्चात्?)क्रम इत्यर्थः। [प० १३६, पा० २] पंच करारण्य(करणानि प्र?)तीतानि। त्र(त्रि)ष्टूत्तरेषु वर्गः प्रथमकरणम्। एवं त्र(त्रि)ष्वधरेषु द्वितीयम्। उभयत उत्तरौ द्वौ तृतीयम्। ध(ए)केन चतुर्थं लभ्यते चतुर्थकरणम्। व्यामिश्रैयु(र्यु)कैरेको वर्गः लभ्यत इति पंचमं करणम्। यद्वा व्यामिश्र एकेन चतुर्थमस्यांतर्गतं चतुर्थोऽयं भेदः। आनुपूर्वी उच्चारणकरणं पंचमम्। अनानुपूर्वी षष्ठं करणमिति ॥ २४५ ॥

अणभिहदा संजुत्ता, पढमं पावंति अप्पणो [प० १३७, पा० १] वग्गं।
आलिंगिया य तत्तो, हसंति एक्केक्कयं ठाणं ॥ २४६ ॥

उत्तरा अनभिहता येऽक्षराः प्रश्नादौ अन्यतमेऽप्रतो वा त एवासंयुक्तौ(क्ता) यदा दृश्यन्ते तदा ते प्रथमवर्गाः स(स्व)वर्गं प्राप्नुवंति। यदा त्वालिंगिता असंयुक्ताश्च तदा एकस्थानह्रासेन ह्रसे

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

(ह्रासं ?) प्राप्नुवंति। निदर्शनम्-[ककारः] खकारेणालिंगितश्चकारं प्राप्नुवं(प्रो)ति। एवं चकारः इ(छ?)कारेणालिंगितः ढ(ट)कारं प्राप्नुवं(प्रो)ति। तथा गकारो [प० १३७, पा० २] घकारेणाभिधूमितः जकारं प्राप्नुवं(प्रो)ति। जकारः झकारेणाभिधूमितः डकारं प्राप्नोति। एवं घकारो ड(ङ?) कारेण दग्धः ककारं प्राप्नोति। एवमन्येऽपि [वर्गा]क्षराः संयुक्ता द्वितीयादिवर्गान् प्राप्नुवंति। द्वितीयवर्गग्रहणेन द्वितीयोऽक्षर उच्यते। त एव संयुक्ता आलिंगिताः स्थानद्वयह्रसि[त]त्वात् ते तदा तृतीयं स्थानं टवर्गं प्राप्नो(प्नुवं)ति। एवं गकारोऽपि संयुक्तो यदाऽऽलिंग्यते तदा [प० १३८, पा० १] तृतीयं वर्गं प्राप्नोति। एवं संयुक्ताभिधूमिताश्चतुर्थो(र्थम् ?) दग्धाः पंचममिति ॥ २४६ ॥

सट्ठाणमुवेंति दढा, बत्तीसं एत्थ होंति संयो(जो)गा।
ह्रस्सा य संति कमसो, चउवग्गकमेण एक्केक्कं ॥ २४७ ॥

स्वस्था[न]मुच(मुपय ?)न्ति दग्धाः। तत्र सरा(प्ता?)क्षरसंयोगेमा(ना)लिंगिताभिधूमितदग्धसंयोगेन च द्वात्रिंस(शत्)संयोगा भवन्ति। तानुपरि निर्वर्णयिष्यति। अष्टौ वर्गाः संयुक्तालिंगितदग्धाभिधूमिता इत्येते चतुर्भिर्विक[प० १३८, पा० २]ल्पैर्गुणिता द्वात्रिंस(त्रिंश)द् भवति(न्ति)। ह्रिस्ता(ह्रसिता)येऽक्षरास्ते आलिंगितास्ते द्वितीयं स्थानं प्राप्नुवंति। अभिधूमिता[ः] तृतीयम्, दग्धा[ः] चतुर्थं स्थानं प्राप्नुवंति। एतच्च निदर्शनेन पूर्वशेषा(षं?) वर्णितमितो(त उ?)क्तम्। अनंतरगाथानुसारेणास्यायमर्थः-'ह्रस्सा लहंति कमसो' चतुर्थवर्गक्रमेणेति एक्केक्कं वर्गं प्राप्नुवन्ति। संयोगस्य [प० १३९, पा० १] च प्रक्रांतत्वात् 'अ इ ए ओ' एते चत्वारः ह्रस्वग्रहणेन स्वरा गृह्यन्ते। तत्र अकारः प्रश्नादौ अन्यत्र वा निरुपहतः अवर्गमेव प्राप्नोति। ककारोपरिगत इकारः कवर्गं प्राप्नोति। चकारोपरिगत एकार[ः] चवर्गं प्राप्नोति। टकारोपरिगतः ओकारः टवर्गं प्राप्नोति ॥ २४७ ॥

बितिय-चउत्थो पंचम-छट्ठो अण्णेसु लहदि [प० १३९, पा० २] आदेसा।
लभदि अ चरिम चउक्को, तकारमादीस(सु?) एक्केक्कं ॥ २४८ ॥

द्वितीय आकारः, चतुर्थ ईकारः, पंचम [उकारः, षष्ठ] ऊकारः। एते चत्वारः स्वरा अन्यवर्गाक्षराणामुपरि प्राप्नुवंति। के ते अन्यवर्गाक्षराः? 'त प य शाः'। तत्र तकारस्योपरिगत आकार[ः] तवर्गं लभते। पकारस्योपरिगत ईकारः पवर्गं लभते। [प० १४०, पा० १]यु(य)कार उकारेण युक्तः प(य?)वर्गं लभते। शकार ऊकारेण युक्तः शवर्गं प्राप्नोति। शकारश्चरिमस्तत्रास्तीति 'त प य शाः' चतु(त्वा)रोऽपि चरिमसंज्ञाः। अत एवानि(वास्मिन्) चतुके(ष्के) ह्रस्वाणां स्वराणां संयोगेन तत्प्राप्नोति(प्राप्ति)रुक्ता ॥ २४८ ॥

अणुवलिया तिहदा वा, जुत्ता पुव्वावरेण एक्केक्कं।
एस सराण णिवेदो(सो), ककारमादी[सु] त(व)ण्णेसु ॥ २४९ ॥

अनुवलितशब्द आलिंगितवापि(ची)। अनुवलिता द्विविधाः-उत्तरान(नु)वलिता अधरानुवलिताश्च। तत्र अधराक्षर उत्तरस्वरसंयुक्त उत्तरान(नु)वलितञ्ज(सञ्ज्ञः ?)। यद्वर्गसंबंधितेन स्वरेणाक्षरो युक्तस्तस्मिन्नेव च वर्गे [प० १४०, पा० २]उत्तरान(नु)वलितत्वादुत्तराक्षरं लभते। स्वरा[णा]मपि मध्ये त्व(त)मेव स्वरमुत्तरं प्राप्नोति। उत्तराक्षरोऽप्यधरस्वरयुक्तो अधरानुवलितसंज्ञः। यद्वर्गसंबंधी(धि ?)तेन स्वरेणाक्षरो युक्तस्तस्मिन्नेव वर्गे अधरानुवलितत्वादधराक्षरं लभते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

 CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

स्वराणामपि मध्ये तमेव स्वरमुत्तरं(मधरं) प्राप्नोति। उत्तराक्षरोऽप्यधरस्वरयुक्तोधर............ ....¹ मिधूम्यते स द्वितीयवर्गमवाप्नोति। निदर्शनम्—ककारोऽभिधूमितः खकारेण [च]वर्गं प्राप्नोति। खकारोऽभिधूमितो घकारेण छवर्गं प्राप्नोति। गकारोऽभिधूमितो घकारेण जवर्गं प्राप्नोति। ककारो दग्धः ङकारेण टवर्गं प्राप्नोति। एवमन्येऽप्यक्षरा[ः] पूर्वाभिहि[प० १४१, पा० २]तविस्तरक्रमेण द्रष्टव्या[ः]। ये संयुक्ताक्षरास्तेषामुपरि योऽक्षरः स स(स्व)वर्गाक्षरं लभते। उत्तरः उत्तराक्षरमधरोऽप्यधराक्षरमवाप्नोति। एष स्वरनिवेशक(शः) सकारादिषु हकारान्तेष्वक्षरे[षु] आलिंगिताभिधूमितदग्धलक्षण उक्तः। ह्रस्वा लभंते। आदिचतुष्कम्—अकारप्रभृतयः। [प० १४२, पा० १]अन्त्यचतुष्कं प्राप्नो(-प्रुव?)ति साभ्यां (?सान्त्यं) वर्गं लभन्त इति ॥२४९॥ अस्यैवार्थस्यातिदेशार्थं कारिकान्तरमाह—

जह चेव सरवसेसो (विभागो?), ककारमादीसु धं(वं)जणेसुं पि।
एमेव [वि] रई(इ)यव्वो, णिरंतरं जाव [उ] हकारो ॥ २५० ॥

एवमेव कर्तव्यो निरंतरं ककारादारभ्य यावत् हकार इत्येष वर्गलब्ध्यर्थं स्वरविभागो विज्ञातव्यो व्यंजनेषु। अयमर्थः पूर्वगाथयाऽभिहित इति नोक्तः ॥ २५० ॥ [प० १४२, पा० २] एवं अनानुपूर्वो(र्वी)प्रपंचेन षष्ठं प्र(?)करणम् ॥

जो य सराण विभागं, देसेदि य सत्तमो य सो करणो।
एमेव वंजणाणं, विभावणो अट्ठमो होति ॥ २५१ ॥

उक्तार्थातिदेशार्थं गाथेयं पठिता। षष्ठमुक्तमनानुपूर्वीकरणम्। अनन्तरं स्वरयोगाद्वर्गलब्धिरुक्ता। असौ स्वरविभागो नाम सप्तमं करणम्। संयुक्तासंयुक्तविकल्पेन वर्गप्राप्तिरित्यष्टमं व्यंजनविभागो नाम प्र(?)करणम् ॥ २५१ ॥

दंसेति सव[ग्ग]क्खर-संजोगं [प० १४३, पा० १] जो य सो हवे णवमो।
परवग्गक्खरसंजोयं, दंसेदि य दसमओ करणे ॥ २५२ ॥

स्ववर्गाक्षरसंयोगेन नवमं करणम्। इदं यथा भवति तथा पूर्वमुक्तम्। परवर्गाक्षरसंयोगा[त्] दशमं करणम्। परवर्गाक्षरसंयोगोऽपि पूर्वाभिह(हि)त एव। अनयोः करणयोर्यथाक्षरलाभ[ः] तथोपरि वर्णयिष्यामः ॥ २५२ ॥

अह उत्तराणुवलिया, हस्सा उ लहंति हस्समन(न्न)यरं।
अहरेणऽवि हम्मंता,[प० १४३, पा० २] तेसिं चिय वग्गमण्णयरं ॥ २५३ ॥

अधराक्षरा उत्तराक्षरैरालिंगिता ह्रस्ववर्गं अन्यं लभन्ते। निदर्शनं यथा—खकारः ककारेणालिंगितो दग्धः कवर्गं प्राप्नोति, तस्मिंश्चोत्तराक्षरम्। एवमन्ये(न्य)वर्गेभ्योऽक्षराः प्राप्नुवन्ति। उत्तराक्षरा अधराक्षरे[ण]अभिहन्यमाना लब्धवर्गेऽधराक्षरं प्राप्नुवन्ति। यथा ककारः खकारेणालिंगित[ः] चवर्गे अधराक्षरं प्राप्नोति, अधरानुवलितत्वात्। अथवा चास्या गाथाया अन्यथा [प० १४४, पा० १]व्याख्यानम्—अधरस्वरा उत्तरैर्ह्रस्वैः स्वैरनुवलिता ह्रस्वस्वरमेवान्यतमं लभन्ते।

---

¹ अत्रादर्शे ३–४ पंक्त्यो विनष्टाक्षरा लभ्यन्ते।

Ganesh Varni Digambar Jain Institute, Naria, Varanasi

CC0.In Public Domain. Digitized by Sarayu Trust/eGangotri

अनुवलितमेव लभ्य(भ)न्ते (?) उत्तरा ह्रस्वाः(?) 'अ इ ए उ' इत्येते अधरेण स्वरेणाभिहन्यमाना अधरमेव स्वरं अनुवलितमभिलभत(न्त) इति ॥ २५३ ॥

एवं अहर चउक्के, आइल्लो पच्छिमो व एमेव ।
चउ तिय एक्कं कमसो, हस्सेसु हवंति आदेसा ॥ २५४ ॥

अनानुपूर्वीमंग(गी)कृत्य अधरचतुष्कं 'क ट प शाः' चत्वार आद्या भण्यन्ते ।[प० १४४,पा० २] अथवा पश्चाद्भवन्तीति पश्चिमाः 'क ट प शाः' । ककारः अकारवर्गश्च(स्य?) पश्चिमो भवति । एवं ने(ज्ञे)यम् । एतदन्यतमाधिके प्रश्ने मध्यमलाभ आदेश्यः । 'अ च त या' आद्याः । उत्तराः तदन्यतमाधिके प्रश्ने उत्कृष्टलाभ आदेश्यः । एषां 'अ च त या'नां मध्ये अकार-चकाराधिके प्रश्ने उत्कृष्टो लाभ आदेश्यः । एषां(वं) 'क ट प शा'नां मध्ये पकार-शकाराधिके प्रश्ने अधमलाभ आदेश्यः ॥ २५४ ॥

जह चेव सरनिवेसो, भणिओ तह चेव वंजणेसुं पि ।
एमेव [वि]रइयव्वो, णिरंतरं जाव उ हकारो ॥ २५५ ॥

